| Roll No. | | | | | | | | | | | | Serial No. of Q. C. A. B. |
|---|---|---|---|---|---|---|---|---|---|---|---|---|

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 50 + 25 = 75 ] [ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 16

Total No. of Questions : 50 + 25 = 75 ] [ Total No. of Printed Pages : 16

**ಸಂಕೇತ ಸಂಖ್ಯೆ : 16-S** ವಿಷಯ : **ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ**

**Code No. : 16-S Subject : First Language — SANSKRIT**

**प्रथम भाषा´ संस्कृतम्**

ದಿನಾಂಕ : 02. 06. 2008 ] [ Date : 02. 06. 2008

ಸಮಯ : ಬೆಳಿಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-30 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-30 P.M.

ಪರಮಾವಧಿ ಅಂಕಗಳು : 125 ] [ Max. Marks : 125

**FOR OFFICE USE ONLY**

**PART – A**

| Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks |
|---|---|---|---|---|---|---|---|---|---|---|---|
| 1. | | 10. | | 19. | | 28. | | 37. | | 46. | |
| 2. | | 11. | | 20. | | 29. | | 38. | | 47. | |
| 3. | | 12. | | 21. | | 30. | | 39. | | 48. | |
| 4. | | 13. | | 22. | | 31. | | 40. | | 49. | |
| 5. | | 14. | | 23. | | 32. | | 41. | | 50. | |
| 6. | | 15. | | 24. | | 33. | | 42. | | × | |
| 7. | | 16. | | 25. | | 34. | | 43. | | × | |
| 8. | | 17. | | 26. | | 35. | | 44. | | × | |
| 9. | | 18. | | 27. | | 36. | | 45. | | × | |

*Total Marks of Part – A*

**PART – B**

| Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks | Q. No. | Marks |
|---|---|---|---|---|---|---|---|---|---|
| 51. | | 56. | | 61. | | 66. | | 71. | |
| 52. | | 57. | | 62. | | 67. | | 72. | |
| 53. | | 58. | | 63. | | 68. | | 73. | |
| 54. | | 59. | | 64. | | 69. | | 74. | |
| 55. | | 60. | | 65. | | 70. | | 75. | |

*Total Marks of Part – B*

| Total Marks in words | | | Grand Total | |
|---|---|---|---|---|
| 1. ✓ | | ✓ | ✓ | |
| 2. ✓ | | | | |
| *Signature of Evaluators* | *Registration No.* | *Signature of the Deputy Chief* | *Signature of the Room Invigilator* | |

[ Turn over

**सामान्य निर्देश :**

i) प्रश्नयुक्तउत्तरपुस्तिकायां **Part - A** एवं **Part - B** इति द्वौ विभागौ स्तः ।

ii) **Part - A** विभागे पंचाशतः ( 50 ) एवं **Part - B** विभागे पंचविंशति ( 25 ) प्रश्नानि सन्ति ।

iii) प्रश्नयुक्तउत्तरपुस्तिकायां उत्तरार्थं स्थानं निर्धारितमस्ति ।

iv) **Part - A** विभागस्य प्रत्येकस्य प्रश्नस्यापि चत्वारि विकल्पानि दत्तानि । तेषु उचितम् उत्तरम् चित्वा निर्दिष्टेषु स्थानेषु लेख्यम् ।

v) **Part - B** विभागे उत्तरार्थं पर्याप्त स्थानानि दत्तानि । प्रश्नस्य उचितम् उत्तरम् निर्दिष्टेषु स्थानेषु लेख्यम् ।

## PART - A

प्रत्येके प्रश्ने चत्वारि अपूर्णानि विकल्पानि सन्ति । समुचितं उत्तरम् निर्धारित स्थाने लेख्यम् । 50 × 1 = 50

1. अनेन आकृष्टः वीरकम्पणः गङ्गादेवीं भार्यात्वेन स्वीचकार —

(A) रूपेण (B) शौर्येण

(C) पाण्डित्येन (D) यौवनेन ।

उत्तरम् : ____________________

2. समासः एवं भवति —

(A) शब्दानुगुणम् (B) अर्थानुगुणम्

(C) लिङ्गानुगुणम् (D) वचनानुगुणम् ।

उत्तरम् : ____________________

3. 'विक्रमार्कचरितम्' — अस्य नामान्तरम् एतदस्ति —

(A) विक्रमोर्वशीयम् (B) विक्रमायणम्

(C) विक्रमार्जुनविजयम् (D) द्वात्रिंशत्पुत्थलिका ।

उत्तरम् : ____________________

4. रथस्य सारथिः भवति —

(A) बुद्धिः (B) रथी

(C) शरीरम् (D) मनः ।

उत्तरम् : ____________________

5. अयं हैडिम्बः अस्ति —

(A) हिडिम्बः (B) भीमः

(C) अभिमन्युः (D) घटोत्कचः ।

उत्तरम् : ____________________

6. विदुरः एनं प्रति राजनीतिम् उपदिशति —

(A) युधिष्ठिरं प्रति (B) धृतराष्ट्रं प्रति

(C) अर्जुनं प्रति (D) दुर्योधनं प्रति ।

उत्तरम् : ____________________

7. 'भवत्' शब्दस्य योगे एष एव पुरुषः प्रयोक्तव्यः —

(A) प्रथमपुरुषः (B) मध्यमपुरुषः

(C) उत्तमपुरुषः (D) महापुरुषः ।

उत्तरम् : ____________________

8. 'अहो महती आपत् उपस्थिता' इति अयम् अचिन्तयत् —

(A) कर्दमः (B) घोषकः

(C) रत्नहरिणः (D) राजा ।

उत्तरम् : ____________________

9. 'कौशलम्' – इत्यत्र अयं प्रत्ययः वर्तते —

(A) त्व (B) अण्

(C) तल् (D) ष्यञ् ।

उत्तरम् : ____________________

10. भारतदेशस्य अस्मिन् प्रदेशे सुपवनः वाति —

(A) आन्ध्र प्रदेशे (B) काश्मीरेषु

(C) राजस्थाने (D) मलयस्थाने ।

उत्तरम् : ____________________

11. रामः अनेन राजभवनं प्रवेशितः —

(A) सुग्रीवेण (B) सुमन्त्रेण

(C) दशरथेन (D) भरतेन ।

उत्तरम् : ____________________

12. हरिणः + धावति — इत्यत्र सन्धिकार्यम् एवं भवति —

(A) हरिणो धावति (B) हरिणर्धावति

(C) हरिण धावति (D) हरिणा धावति ।

उत्तरम् : ____________________

13. मनसः नियन्त्रणम् अनेन च कर्तुं शक्यते —

(A) पठनेन लेखनेन क्रीडनेन च (B) भाषणेन गायनेन भोजनेन च

(C) व्यसनेन निद्रया कलहेन च (D) तपसा ध्यानेन योगाभ्यासेन च ।

उत्तरम् : ____________________

14. अध्ययनानन्तरं राधाकृष्णन् महोदयः स्वस्य अध्यापकवृत्तिम् अस्मिन् नगरे आरभत —

(A) मैसूरुनगरे (B) वेल्लूरुनगरे

(C) मद्रासनगरे (D) कलिकातानगरे ।

उत्तरम् : ____________________

15. 'त्रीणि' - अस्य क्रमवाचकः अयं भवति —

(A) द्वितीयः (B) तृतीयः

(C) तुरीयः (D) त्रयोदशः ।

उत्तरम् : ____________________

16. एते बुभुक्षिता अपि तृणं नैव चरन्ति —

(A) गावः (B) अश्वाः

(C) गजाः (D) सिंहाः ।

उत्तरम् : ____________________

17. एतेषु समूहेतरपदम् इदं भवति —

(A) हृदयामृतम् (B) अष्टाङ्गहृदयम्

(C) चरकसंहिता (D) सुश्रुतसंहिता ।

उत्तरम् : ____________________

18. जगाम — लिट् लकारः, लप्स्यते — ...................... अत्र चतुर्थं पदम् एतदस्ति —

(A) लट् (B) लृट्

(C) लोट् (D) लङ् ।

उत्तरम् : ____________________

19. 'राक्षसताल्' — इति एतस्य नाम

(A) राक्षसस्य (B) रावणस्य

(C) पर्वतस्य (D) सरसः ।

उत्तरम् : ____________________

20. अत्र त्रिकालनाथो नाम मुनिः निवसति —

(A) पर्वतमूले (B) तपोवने

(C) पर्वतशिखरे (D) आश्रमपदे ।

उत्तरम् : ____________________

21. एतेषु शुद्धं वाक्यम् इदमस्ति —

(A) लेखनस्य प्राक् पठ (B) लेखनात् प्राक् पठ

(C) लेखनाय प्राक् पठ (D) लेखनेन प्राक् पठ ।

उत्तरम् : ____________________

22. रघुः अर्थम् अस्मात् निष्कृष्टुं चकमे —

(A) कुबेरात् (B) कौत्सात्

(C) इन्द्रात् (D) कालिदासात् ।

उत्तरम् : ____________________

23. यत्–तत्, यत्र — .......................... अत्र चतुर्थं पदम् एतत् भवति —

(A) कुत्र (B) अत्र

(C) तत्र (D) सर्वत्र ।

उत्तरम् : ____________________

24. अयं कदाचित् न व्यथते —

(A) मद्यसेवी (B) तक्रसेवी

(C) क्षीरसेवी (D) औषधसेवी ।

उत्तरम् : ____________________

25. वराहमिहिरस्य अयं ग्रन्थः आल्बेरूनिमहाशयेन अरेबिक् भाषया अनूदितोऽस्ति —

(A) पञ्चसिद्धान्तिका (B) लघुजातकम्

(C) बृहज्जातकम् (D) बृहत्संहिता ।

उत्तरम् : ____________________

26. नयन्तु, परन्तु, हरन्तु, कुर्वन्तु - एतेषु समूहेतरपदं एतदस्ति —

(A) नयन्तु (B) परन्तु

(C) हरन्तु (D) कुर्वन्तु ।

उत्तरम् : ____________________

27. जनाः एतदर्थं रत्नहरिणं हन्युः —

(A) चर्मणः आशया (B) मांसस्य आशया

(C) रत्नानाम् आशया (D) सुवर्णशताशया ।

उत्तरम् : ____________________

28. राजानः एतैः पश्यन्ति —

(A) वेदैः (B) शास्त्रैः

(C) चोरैः (D) चारैः ।

उत्तरम् : ______________________________

29. दशरथस्य — वसिष्ठः, तारापीडस्य — ................................ अत्र चतुर्थपदम् एतत् भवति —

(A) चन्द्रापीडः (B) शुकनासः

(C) शुनासीरः (D) बृहस्पतिः ।

उत्तरम् : ______________________________

30. 'सचित्रम्' — इत्यस्य विग्रहवाक्यम् एवं भवति —

(A) चित्रेण सहितम् (B) चित्रस्य सहितम्

(C) समानं चित्रम् (D) चित्रं च सहितम् च ।

उत्तरम् : ______________________________

31. 'वेदान्ता' — इति एतासां नामान्तरम् —

(A) वेदानाम् (B) वेदाङ्गानाम्

(C) पुराणानाम् (D) उपनिषदाम् ।

उत्तरम् : ______________________________

32. सुरेशः कार्यं कृत्वा अलिखत् — वाक्येऽस्मिन् कृदन्तपदम् इदमस्ति —

(A) सुरेशः (B) कार्यं

(C) कृत्वा (D) अलिखत् ।

उत्तरम् : ______________________________

33. वीररसप्रधानम् एतत् महाकाव्यम् —

(A) रघुवंशम् (B) मधुराविजयम्

(C) रामायणम् (D) महाभारतम् ।

उत्तरम् : ______________________________

34. 'धर्मार्थकाममोक्षाः' — इत्यत्र अयं समासः —

(A) द्वन्द्वः (B) द्विगुः

(C) अव्ययीभावः (D) बहुव्रीहिः ।

उत्तरम् : ______________________________

35. मनुष्येभ्यः अर्थान् एवम् आदद्यात् —

(A) शक्त्या (B) युक्त्या

(C) हिंसया (D) अविहिंसया ।

उत्तरम् : ______________________________

36. सकलभुवनभारः अस्य मूर्ध्नि स्थापितः —

(A) रामस्य (B) भरतस्य

(C) दशरथस्य (D) सुमन्त्रस्य ।

उत्तरम् : ______________________

37. प्रतिज्ञाव्याघाते अर्जुनः अनेन सह चितारोहणं करोति —

(A) अभिमन्युना सह (B) श्रीकृष्णेन सह

(C) घटोत्कचेन सह (D) गाण्डीवेन सह ।

उत्तरम् : ______________________

38. 'क्तवतु' — प्रत्ययः धातुभ्यः अस्मिन् काले प्रयुज्यते —

(A) भूतकाले (B) वर्तमानकाले

(C) भविष्यत्काले (D) प्रातःकाले ।

उत्तरम् : ______________________

39. आधुनिकयुगे शिक्षायाः महत्वपूर्णम् अङ्गम् अस्ति —

(A) विद्यालयः क्रीडाङ्गणम् च (B) ग्रन्थालयः दूरदर्शनं च

(C) ग्रन्थालयः अन्तर्जालं च (D) शौचालयः अन्तर्जालं च ।

उत्तरम् : ______________________

40. भारतधरणी एतेषाम् आश्रयलोकः —

(A) पुण्यजनानाम् (B) पुण्यपराणाम्

(C) पुण्यवताम् (D) पुण्यनदीनाम् ।

उत्तरम् : ______________________

41. 'चम्पुरामायणम्' — काव्यस्य कविः एषः —

(A) कुवेम्पु (B) वाल्मीकिः

(C) कालिदासः (D) भोजराजः ।

उत्तरम् : ______________________

42. मानससरसः परिधिः सामान्यतः ........................ किलोमीटर् इति वदन्ति ।

(A) द्वादश (B) चतुर्दश

(C) द्विशत (D) त्रिशत ।

उत्तरम् : ______________________

43. आनीय, पठनीय:, निपीय, प्रविश्य — एतेषु समूहेतरपदम् इदमस्ति —

(A) आनीय (B) पठनीय:

(C) निपीय (D) प्रविश्य ।

उत्तरम् : ____________________

44. विद्यायाम् एवं विभाग: वर्तते —

(A) जीविकाविद्या आत्मविद्या इति (B) आत्मविद्या अध्यात्मविद्या इति

(C) अध्यात्मविद्या सद्विद्या इति (D) सद्विद्या आत्मविद्या इति ।

उत्तरम् : ____________________

45. विसर्गात् परं कर्कशव्यञ्जनानि भवन्ति चेत् विसर्गस्थाने एष आदेश: भवति —

(A) मकारादेश: (B) उकारादेश:

(C) सकारादेश: (D) रेफादेश: ।

उत्तरम् : ____________________

46. राजा दशरथ: अस्य प्रसादात् चतुर: पुत्रान् अवाप —

(A) वाल्मीके: (B) ऋष्यशृङ्गस्य

(C) वसिष्ठस्य (D) विश्वामित्रस्य ।

उत्तरम् : ____________________

47. स्वार्थोपपत्तिं प्रति एष: दुर्बलाश: अभवत् —

(A) रघु: (B) कुबेर:

(C) वरतन्तु: (D) कौत्स: ।

उत्तरम् : ____________________

48. अस्मिन् अवधौ राधाकृष्णन् आन्ध्रविश्वविद्यालये उपकुलपतिरासीत् —

(A) क्रि० श० 1933 – 1937 (B) क्रि० श० 1932 – 1935

(C) क्रि० श० 1932 – 1936 (D) क्रि० श० 1942 – 1946.

उत्तरम् : ____________________

49. राजकुमारस्य राज्यम् एतै: अपहृतम् आसीत् —

(A) दायादै: (B) चोरै:

(C) शत्रुभि: (D) विदेशीयै: ।

उत्तरम् : ____________________

50. ग्रहणं नाम आकाशे सम्पत्स्यमाना एतयो: क्रीडा —

(A) सूर्यचन्द्रयो: (B) राहुकेत्वो:

(C) भूमिबुधयो: (D) छायाप्रकाशयो: ।

उत्तरम् : ____________________

## PART - B

यथानिर्देशम् उत्तरं लिखत — 4 × 3 = 12

51. तात ! बालो न बाल इति ।
क: पाठ: ?
क: अवदत् ?
क: न बाल: ?

52. दिग्विजयाय दक्षिणदेशं प्रतस्थे ।
क: पाठ: ?
क: प्रतस्थे ?
कस्य आदेशानुसारं प्रतस्थे ?

53. प्राप्तोऽसि सम्भावयितुं वनान्माम् ।
क: पाठ: ?
क: अवदत् ?
क: वनात् प्राप्त: ?

54. किं ते लज्जा नास्ति ?
क: पाठ: ?
क: अवदत् ?
कम् अवदत् ?

**द्वयोः** कव्योः देशकालकृतीनां विषये लिखत — 2 × 3 = 6

55. कालिदासः

56. बाणभट्टः

श्लोकतात्पर्यं कर्णाटकभाषया आंग्लभाषया संस्कृतभाषया वा लिखत — 2 × 3 = 6

57. यस्तु विज्ञानवान् भवति
युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि
सदश्वा इव सारथेः ॥

58. रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥

**अथवा**

अत्यम्बुपानात् विषमाशनाच्च
दिवा च सुप्तेः निशि जागराच्च ।
संरोधनान्मूत्रपुरीषयोश्च
षड्भिः निदानैः प्रभवन्ति रोगाः ॥

लघूत्तरं लिखत — 4 × 2 = 8

59. खलसज्जनानां मैत्री विवृणुत ।

60. अध्ययनानन्तरम् राधाकृष्णन् कुत्र-कुत्र प्राध्यापकवृत्तिम् अकरोत् ?

61. अन्तर्जालस्य प्रयोजनं किम् ?

62. मानससरसः उद्भवविषये का पुराणकथा अस्ति ?

**अथवा**

विलासवती कथम् आसीत् ?

63. प्रयोगं परिवर्तयत — 1 × 2 = 2

राधा फलं नयति ।

64. तद्धितपदं वियुज्य प्रत्ययस्य नाम लिखत — 1 × 2 = 2

वासुदेवः

श्लोकौ पूरयत — 2 × 4 = 8

65. वित्तेन ..............................................................

.............................................................................. ।

.................................................................................

.................................................................... बन्धुः ॥

66. शिरसि ........................................................

..................................................................... ।

.......................................................................

............................................... मामकजननीयम् ॥

67. अत्रत्यं अलङ्कारं विवृणुत — 3
कादम्बरी रसज्ञानाम् आहारोऽपि न रोचते ।

68. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत — 3
प्रारभ्यते न खलु विघ्नभयेन नीचैः ।

दशवाक्यमितम् उत्तरं कर्णाटकभाषया आङ्ग्लभाषया संस्कृतभाषया वा लिखत — $3 \times 3 = 9$

69. विक्रमस्य औदार्यं सङ्गृह्य लिखत ।

70. वराहमिहिरस्य कृतीनां विषये लिखत ।

71. आरोग्यनियमान् पद्यानुगुणं सङ्गृह्य लिखत ।

**अथवा**

रघोः औदार्यं वर्णयत ।

72. कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत — 3

वाल्मीकिना विरचितम् रामायणम् आदिकाव्यम् इत्येव प्रसिद्धम् । काव्येऽस्मिन् मर्यादापुरुषोत्तमस्य श्रीरामस्य कथा वर्तते । तस्य आदर्शगुणाः अस्माभिः सर्वैः अनुसरणीयाः सन्ति ।

73. संस्कृतभाषया अनुवादं कुरुत : 3

ನಮ್ಮ ಊರಿನ ಹೊರಗೆ ಒಂದು ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಪ್ರತಿದಿನ ಸಂಜೆ ಅನೇಕ ಜನರು ಅಲ್ಲಿಗೆ ಹೋಗಿ ವಿಹರಿಸುತ್ತಾರೆ. ಉದ್ಯಾನದ ಸೌಂದರ್ಯವನ್ನು ನೋಡಿ ಅವರು ಆನಂದವನ್ನು ಅನುಭವಿಸುತ್ತಾರೆ.

There is a beautiful garden outside our village. Many people go there and relax every evening. By seeing the beauty of the park they feel happy.

74. दिनत्रयस्य विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति पत्रं लिखत । 5

**अथवा**

मैसूरुनगरे वर्तमानस्य चेतना प्रकाशनस्य व्यवस्थापकं प्रति पुस्तकं प्रेषणाय पत्रं लिखत ।

75. एकस्य विषयमधिकृत्य प्रबन्धं लिखत — 5

स्वातंत्र्योत्सवः

**अथवा**

संस्कृतभाषायाः गरिमा ।